कर्म्मधारयः।) अपघातमरणं। विना रोगेण मरणं। यथा,—

"अपमृत्युभयं नास्ति मृतो मोक्षमवाप्नुयात्"।

इति देवीमाहात्म्यकीलकं॥ यत्तु शुद्धितत्त्वे प्रोक्तं पक्षिमत्स्यमृगदंष्ट्रिशृङ्गिनखिपतनानशनवह्न्यम्बुविषबन्धजलप्रवेशांस्त्रहतादिजन्यमरणं तदेवापमृत्युरिति सुधीभिर्विभाव्यं॥

अपयानं, क्ली, (अप + या + भावे ल्युट्) पलायनं। इत्यमरः॥ प्रमाणं। प्रस्थानं। "मानस्य हुतमपयानमास्थितस्य"। इति माघः।)

"अपयानेऽपि च भवान् समर्थो लघुविक्रमः"।

इति रामायणे।

अपरं, क्ली, (न पूर्य्यते, पृ + अप् ततो नञ्समासः।) हस्तिपश्चाद्भागः। गजान्त्यजङ्घादिभागः। इति मेदिनी॥

अपरः, त्रि, (न पृणाति प्रीणयति, पृ + पचाद्यच, ततो नञ्समासः।) अन्यः। इतरः। अर्व्वाचीनः। इति मेदिनी॥

अपरत्वं, क्ली, (अपरस्य भावः भावे त्व।) न्यायमते तत् द्विविधं। दैशिकं कालिकञ्च। दैशिकं यथा। अल्पसूर्य्यसंयोगज्ञानजन्यगुणः। तस्यासमवायिकारणं दिक्संयोगः॥ कालिकं यथा॥ अल्पसूर्य्यपरिस्पन्दज्ञानजन्यगुणः। तस्यासमवायिकारणं कालपिण्डसंयोगः। तदुभयं अपेक्षाबुद्धिजन्यं। अपेक्षाबुद्धिनाशादेव तदुभयोर्नाशः। इति सिद्धान्तमुक्तावली॥

अपरतिः, स्त्री, (अप + रम् + भावे क्तिन्।) निवृत्तिः। विरतिः। इति हेमचन्द्रः॥ (अपगता रतिः प्रीतिर्यस्य सः त्रि, प्रीतिरहितः। अपकृष्टा रतिः प्रीतिर्यस्य सः त्रि, कुत्सितप्रीतियुक्तः।)

अपरपक्षः, पुं, (अपरः शेषः पक्षः अथवा अपरः शुक्लादितरः पक्षः, कर्म्मधारयः।) कृष्णपक्षः। स तु पितृपक्षः। यथा। पूर्व्वः पक्षो देवानामपरः पक्षः पितॄणामिति श्रुतिः॥ पक्षौ पूर्व्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ। इत्यमरः॥ मनुः। अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् पञ्चमीप्रभृति वापरपक्षस्य यदहर्व्वा सम्पद्यते। इति श्राद्धतत्त्वम् *॥

अपररात्रः, पुं, (रात्रेः अपरः शेषावयवः, एकदेशिसमासः, अच् समासान्तः "रात्राह्नाहाः पुंसि" इति पुंस्त्वं।) रात्रिशेषः। तत्पर्य्यायः। उषन्द्रः २। इति त्रिकाण्डशेषः॥

अपरस्परं, त्रि, (अपरे च परे च द्वन्द्वः, अपरस्पराः क्रियासातत्ये" इति सुडागमः, क्रियावतां साहित्ये।) क्रियासातत्यं। कर्मनिरन्तरता। इत्यमरः॥

अपरा, स्त्री, (न पूर्य्यतेऽस्मात्, पृ + अपादाने अप्, ततो नञ्समासः।) जरायुः। इति मेदिनी॥ पश्चिमदिक्। इति हेमचन्द्रः॥

अपराङ्गं, क्ली, (अपरस्य रसादेरङ्गम्, षष्ठीतत्पुरुषः।) गुणीभूतव्यङ्ग्यप्रभेदः। यथा अगूढमपरस्याङ्गमिति भरतमुनिः॥ अस्यार्थः। अपरस्य रसादेर्वाच्यीभूतस्य वा वाच्यस्याङ्गं रसादि अनुरणनरूपं वा। इति काव्यप्रकाशः॥ तत्रैवोदाहरणं।

"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"॥ अत्र शृङ्गारः करुणस्याङ्गमिति॥

अपराङ्मुखः, पुं, (परा + अञ्च + क्विन्, पराक् मुखं यस्य सः, ततो नञ्समासः।) अविमुखः। संमुखीभूतः। यथा,—

"आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः। युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः"॥

इति मानवे ७ अध्याये ८९ श्लोकः॥

अपराजितः, पुं, (परा + जि + क्तः, ततो नञ्समासः।) शिवः। विष्णुः। ऋषिविशेषः। अनिर्जिते त्रि। इति मेदिनी॥

अपराजिता, स्त्री, दुर्गा। जयन्तीवृक्षः। अश्मपर्णी। इति मेदिनी॥ स्वल्पफला। विष्णुक्रान्ता। इति राजनिर्घण्टः॥ शेफाली। शमीभेदः। शङ्खिनी। क्षुपभेदः। इति वैद्यकं॥ स्वनामख्यातपुष्पलताविशेषः। शुक्लनीलभेदेन सा द्विधा। तस्याः पर्य्यायः। आस्फोता २ गिरिकर्णी ३ विष्णुक्रान्ता ४। इत्यमरः॥ आस्फोटा ५। इति तट्टीका॥ गवाक्षी ६ अश्वखुरी ७ श्वेता ८ श्वेतभण्डा ९ गवादनी १०। इति रत्नमाला॥ अद्रिकर्णी ११ कटभी १२ दधिपुष्पिका १३ गर्द्दभी १४ सितपुष्पी १५ श्वेतस्यन्दा १६ भद्रा १७ सुपुत्री १८ विषहन्त्री १९ नगपर्य्यायकर्णी २० अश्वाह्वादिखुरी२१। अस्या गुणाः। हिमत्वं। तिक्तत्वं। पित्तोपद्रवविषदोषनाशित्वं। चक्षुर्हितत्वं। त्रिदोषशमताकारित्वञ्च। इति राजनिर्घण्टः॥ शोथकासनाशित्वं। कण्ठहितकारित्वञ्च। इति राजवल्लभः॥

("दशम्यां च नरैः सम्यक् पूजनीयाऽपराजिता।
मोक्षार्थं विजयार्थञ्च पूर्व्वोक्तविधिना नरैः।
नवमीशेषयुक्तायां दशम्यामपराजिता।
ददाति विजयं देवी पूजिता जयवर्द्धिनी"॥
इति स्कान्दे।)

अपराद्धपृषत्कः, त्रि, (अपराद्धः लक्ष्यात् च्युतः पृषत्कोवाणो यस्य सः।) लक्ष्यच्युतशायकः। यस्य वाणो लक्ष्यात् च्युतः सः। इत्यमरः॥

("क्षतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत्।
अपराद्धपृषत्कोऽसौ लक्ष्यात् यश्च्युतसायकः"॥
इत्यमरः।)

अपराधः, पुं, (अप + राध् + भावे घञ्।) अकार्य्यादिदोषः। तत्पर्य्यायः॥ आगः २ मन्तुः ३। इत्यमरः॥ स च द्वात्रिंशद्विधो यथा। आगमे।

"यानैर्व्वा पादुकैर्व्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः॥
उच्छिष्टे वाथवाशौचे भगवद्दर्शनादिकं।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणं॥
पादप्रसारणं चाग्रे तथा पर्य्यङ्कबन्धनम्।
शयनं भक्षणं वापि मिथ्याभाषणमेव च॥
उच्चैर्भाषामिथोजल्पो रोदनानि च विग्रहः।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम्
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः।
अश्लीलभाषणं चैव अधोवायुविमोक्षणम्॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणं।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणं॥
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके।
पृष्ठीकृत्यासनं चैव परेषामभिवादनं॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः"॥*॥

वाराहे।

"द्वात्रिंशदपराधा ये कीर्त्त्यन्ते वसुधे मया।
वैष्णवेन सदा ते तु वर्जनीयाः प्रयत्नतः॥
ये वै न वर्जयन्त्येतान् अपराधान् मयोदितान्।
सर्व्वधर्म्मपरिभ्रष्टाः पच्यन्ते नरके चिरं॥
राजान्नभक्षणञ्चैकमापद्यपि भयावहं।
ध्वान्तागारे हरेः स्पर्शः परं सुकृतनाशनः॥
तथैव विधिमुल्लङ्घ्य सहसा स्पर्शनं हरेः।
द्वारोद्घाटो विना वाद्यं क्रोड़मांसनिवेदनं॥
पादुकाभ्यां तथा विष्णोर्मन्दिरायोपसर्पणं।
कुक्कुरोच्छिष्टकलनं मौनभङ्गोऽच्युतार्च्चने॥
तथा पूजनकाले च विडुत्सर्गाय सर्पणं।
श्राद्धादिकमकृत्वा च नवान्नस्य च भक्षणं॥
अदत्त्वा गन्धमाल्यादि धूपनं मधुघातिनः।
अकर्म्मण्यप्रसूनेन पूजनञ्च हरेस्तथा॥
अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा।
स्पृष्ट्वा रजस्वलां दीपं तथा मृतकमेव च॥
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटं।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतं॥
क्रोधं कृत्वा श्मशानञ्च गत्वा भूत्वाप्यजीर्णभुक्।
भक्षयित्वा क्रोड़मांसं पिण्याकं जालपादकं॥
तथा कुसुम्भशाकञ्च तैलाभ्यङ्गं विधाय च।
हरेः स्पर्शो हरेः कर्म्मकरणं पातकावहं॥*॥

किञ्च तत्रैव।

मम शास्त्रं वहिष्कृत्य अस्माकं यः प्रपद्यते।
मुक्त्वा च मम शास्त्राणि शास्त्रमन्यत् प्रभाषते॥
मद्यपस्तु समासाद्य प्रविशेद्भवनं मम।
यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः॥

अपि च।

"मम दृष्टेरभिमुखं ताम्बूलं चर्व्वयेत्तु यः।
कुरुवकपलाशस्थैः पुष्पैः कुर्य्यान्ममार्च्चनं॥
ममार्च्चामासुरे काले यः करोति विमूढ़धीः।
माठाशनोपविष्टो यः पूजयेद्वा निरासनः॥
वामहस्तेन मां धृत्वा स्नापयेद्वा विमूढ़धीः।
पूजापर्य्युषितैः पुष्पैः ष्ठीवनं गर्व्वकल्पनं॥
तिर्य्यक् पुण्ड्रधरो भूत्वा यः करोति ममार्च्चनं।
याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्च्चनं॥
अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरं।
अवैष्णवस्य पक्वान्नं यो मह्यं विनिवेदयेत्॥
अवैष्णवेषु पश्यत्सु मम पूजां करोति यः।
अपूजयित्वा विघ्नेशं सम्भाष्य च कपालिनं॥
नरः पूजान्तु यः कुर्य्यात् स्नपनञ्च नखाम्भसा।
अमौनी घर्म्मलिप्ताङ्गो मम पूजां करोति यः॥